

द्वितीयः पाठः २

# अकारान्त-पुँल्लिङ्गशब्दप्रयोगः



गणेशः


सूर्यः



चन्द्रः



वृक्षः


मेघः


पर्वतः


मयूरः



कपोतः



काकः



शुकः



हंसः



कुक्कुटः



सिंहः



गजः



भल्लूकः



उष्ट्रः


अश्वः


वृषभः



हरिणः



गर्दभः



मेषः



बिडालः



मूषकः


सर्पः



मीनः



मकरः


मण्डूकः


कच्छपः


शशकः



कुक्कुरः


अध्यापकः


छात्रः



कृषकः


चिकित्सकः


सौचिकः


रजकः


सैनिकः


कुम्भकारः



क्रीडकः



विद्यालयः



आपणः


देवालयः


घटः


चमसः


कंसः

## वचन-प्रयोगः




बालकः




बालकौ




बालकाः




गजः



गजौ




गजाः



कपोतः



कपोतौ



कपोताः



सैनिकः




सैनिकौ




सैनिकाः



वृक्षः



वृक्षौ




वृक्षाः


## क्रिया-प्रयोगः


बालकः पठति।


बालकौ पठतः।



बालकाः पठन्ति।



शशकः खादति।


शशकौ खादतः।


शशकाः खादन्ति।


छात्रः क्रीडति।



छात्रौ क्रीडतः।


छात्राः क्रीडन्ति।


| | | |
|---|---|---|
| गजः चलति। | गजौ चलतः। | गजाः चलन्ति। |
| अश्वः धावति। | अश्वौ धावतः। | अश्वाः धावन्ति। |
| कृषकः गच्छति। | कृषकौ गच्छतः । | कृषकाः गच्छन्ति । |
| अध्यापकः आगच्छति । | अध्यापकौ आगच्छतः। | अध्यापकाः आगच्छन्ति। |
| रजकः क्षालयति। | रजकौ क्षालयतः। | रजकाः क्षालयन्ति। |

## अभ्यासः


### १. चित्रं दृष्ट्वा नाम लिखत -



..........................




..........................



..........................



..........................




..........................





..........................


### २. चित्रं दृष्ट्वा उचितं वचनप्रयोगं कुरुत-



गजः



..........................



..........................



..........................



मयूरौ



..........................



..........................



..........................




छात्राः

### ३. चित्रं दृष्ट्वा उचित-क्रियापदेन रिक्तस्थानानि पूरयत -



बालकाः .................. ।



शशकः .................. ।



अश्वौ ................ ।

### ४. उदाहरणानुसारं रिक्तस्थानानि पूरयत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | सूर्यः | सूर्यौ | सूर्याः |
| | काकः | ............... | .............. |
| | .............. | शुकौ | .............. |
| | .............. | .............. | वृषभाः |
| | घटः | .............. | .............. |
| | .............. | मेघौ | .............. |
| | .............. | .............. | चिकित्सकाः |

### ५. क्रियापदानाम् उचित-वचनरूपैः रिक्तस्थानानि पूरयत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| यथा- | पठति | पठतः | पठन्ति |
| | लिखति | .............. | .............. |
| | .............. | .............. | आगच्छन्ति |
| | .............. | खादतः | .............. |
| | धावति | .............. | .............. |
| | .............. | गच्छतः | .............. |
| | .............. | .............. | क्रीडन्ति |

### ६. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानानि पूरयत-

(क) ........................ खादन्ति। (कपोतः/कपोतौ/कपोताः)

(ख) ........................ आगच्छति। (चिकित्सकः/चिकित्सकौ/चिकित्सकाः)

(ग) ........................ पठतः। (बालकः/बालकौ/बालकाः)

(घ) ........................ क्रीडति। (क्रीडकः/क्रीडकौ/क्रीडकाः)

(ङ) ........................ धावन्ति। (हरिणः/हरिणौ/हरिणाः)

### ७. कोष्ठकात् उचितं क्रियापदं चित्वा रिक्तस्थानानि पूरयत-

(क) अध्यापकौ ........................। (गच्छति/गच्छतः/गच्छन्ति)

(ख) रजकाः ........................। (क्षालयति/क्षालयतः/क्षालयन्ति)

(ग) छात्रः ........................। (क्रीडति/क्रीडतः/क्रीडन्ति)

(घ) कृषकौ ........................। (चलति/चलतः/चलन्ति)

(ङ) मूषकः ........................। (धावति/धावतः/धावन्ति)

### ८. प्रदत्त-पदानुसारं चित्रनिर्माणं कुरुत-

| | |
|---|---|
| सूर्यः | वृक्षः |
| घटौ | चमसाः |

## योग्यता-विस्तारः

**१. ध्यानेन पठत अवगच्छत च-**

र् + आ + म् + अ = राम ( राम + : = रामः )

ब् + आ + ल् + अ + क् + अ = बालक ( बालक + : = बालकः )

म् + अ + य् + ऊ + र् + अ = मयूर ( मयूर + : = मयूरः )

२. एते सर्वे पुँल्लिङ्गशब्दाः । एतेषाम् अन्ते 'अ' ( अकारः ) अस्ति, अतः एते अकारान्त-पुँल्लिङ्गशब्दाः सन्ति।

> येषां पुँल्लिङ्गशब्दानाम् अन्ते अकारः भवति, ते अकारान्त-पुँल्लिङ्गशब्दाः भवन्ति। यथा- रामः, बालकः, कपोतः इत्यादयः।

**अवधेयम्** →

> **संस्कृते त्रीणि लिङ्गानि भवन्ति -**
>
> 1. पुँल्लिङ्गम् 2. स्त्रीलिङ्गम् 3. नपुंसकलिङ्गम्
>
> **संस्कृते त्रीणि वचनानि भवन्ति -**
>
> 1. एकवचनम् 2. द्विवचनम् 3. बहुवचनम्

३. भवतां कक्षायां कुटुम्बे वा येषां नामानि अकारान्तपुँल्लिङ्गे सन्ति, तेषां नामानि लिखन्तु ।

## वर्ण-विलासः

**ध्यानेन पठत-**

यथा - गजः = ग् + अ + ज् + अ + :
(ग् + अ = ग ; ज् + अ + : = जः)

स् + ऊ + र् + य् + अ + : = सूर्यः

ह् + अ + र् + इ + ण् + अ + : = हरिणः

अ + ध् + य् + आ + प् + अ + क् + अ + : = अध्यापकः

प् + अ + ठ् + अ + न् + त् + इ = पठन्ति

- गणेशः, मूषकः, मयूरः, धावति, क्रीडन्ति एतेषां पदानाम् अपि वर्णविच्छेदं कुरुत।